दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णदशमी
माघ 29 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-111 | 1 | फरवरी 11, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 'बस्तर-पाण्डुम-उत्सवः' बस्तरक्षेत्रस्य समृद्धसंस्कृतिं, परम्पराः, जनजातीय-विरासतं च उत्कृष्टरीत्या प्रदर्शितवान्-प्रधानमन्त्री

3 संस्कृतपत्रकारितायाः अनुभवाः, परिवर्तनानि, समाह्वानानि च (अनुभवाधारितः विमर्शात्मकः लेखः

4 पाश्चात्यसंस्कृतेः प्रभावतः अद्यतनाः बालाः शनैः स्वकीयं संस्कृति-संस्कारादिकं विहाय विपरीतदिशि धावमानाः दृश्यन्ते

## देशे २९ सहस्रतः अधिकानि सार्वजनिकानि विद्युत्-वाहन-भारण-केन्द्राणि (Electric Vehicle Charging Stations) स्थापितानि




देशे आहत्य २९ सहस्रतः अधिकानि सार्वजनिकानि विद्युत्-वाहन-भारण-केन्द्राणि स्थापितानि सन्ति। भारी-उद्योग-राज्यमन्त्री भूपतिराजु श्रीनिवास वर्मा लोकसभायां एकस्य प्रश्नस्य लिखितोत्तरे एतां सूचनां दत्तवान्। सः अकथयत् यत् सर्वकारेण देशव्यापि पर्याप्तं सार्वजनिकं विद्युत्-वाहन-भारण-आधारभूत-संरचनां स्थापयितुं फेम-२ (FAME-II) योजनायाः अन्तर्गतं ९१२ कोटिरुप्यकेभ्यः अधिकं तथा च पीएम ई-ड्राइव (PM E-DRIVE) योजनायाः अन्तर्गतं २ सहस्रकोटि-रुप्यकाणि आवण्टितानि सन्ति।फेम-२ योजनायाः मुख्योद्देश्यं क्रयणे अग्रिम-प्रोत्साहनं दत्त्वा विद्युत्-सङ्कर-वाहनानां (Electric and Hybrid Vehicles) अङ्गीकरणाय प्रोत्साहनं दानम् अस्ति। सः अवदत् यत् अस्याः योजनायाः माध्यमेन मन्त्रालयेन गतवर्षे सार्वजनिक-विद्युत्-वाहन-भारण-केन्द्राणां स्थापनार्थं परिचालन-दिशानिर्देशाः निर्गताः आसन्।

## लोकसभाध्यक्षस्य ओमबिरलामहोदयस्य विरुद्धं विपक्षेण अविश्वासप्रस्तावस्य सूचना दत्ता



लोकसभायां विपक्षेण अध्यक्षस्य ओमबिरलामहोदयस्य विरुद्धं अविश्वासप्रस्तावस्य सूचना (नोटिस) दत्ता अस्ति। लोकसभायाः सूत्रानुसारं, विपक्षेण एषा सूचना लोकसभायाः महासचिवं प्रति समर्पिता। सूत्रैः उक्तं यत् अस्याः सूचनायाः परीक्षणं भविष्यति, नियमानुसारं च अग्रे प्रवर्तनं करिष्यते। कांग्रेस-डीएमके-समाजवादी-आरजेडी-वामपन्थीदलैः सहिताः अन्ये विपक्षीदलाः महासचिवं प्रति समर्पिते अस्मिन् सूचनापत्रे हस्ताक्षराणि अकुर्वन्, परन्तु तृणमूलकाङ्ग्रेसदलेन अत्र हस्ताक्षरं न कृतम्।

## बायोफैच २०२६: भारतं 'वर्षस्य सर्वश्रेष्ठदेशः' इति सम्मानेन पुरस्कृतम्




जर्मनीदेशस्य नूरेमबर्ग-नगरे आयोजिते जैविक-उत्पादानां विश्वस्य प्रमुखे व्यापारमेलायां 'बायोफैच २०२६' मध्ये भारताय प्रतिष्ठितः 'वर्षस्य सर्वश्रेष्ठदेशः' (Country of the Year) इति सम्मानः प्रदत्तः। एषः सम्मानः चतुर्दशवर्षाणां पश्चात् वैश्विक-जैविक-कृषि-क्षेत्रे भारतस्य पुनरागमनस्य प्रतीकः अस्ति। बायोफैच-मेला फरवरी-मासस्य १३ दिनाङ्कपर्यन्तं प्रचलति। 'कृषि एवं प्रसंस्कृत खाद्य उत्पाद निर्यात विकास प्राधिकरण' (APEDA) द्वारा आयोजिते भारत-मण्डपे (India Pavilion) निर्यातकाः, कृषक-उत्पादक-संस्थाः, राज्यसर्वकारस्य निकायाः च मिलित्वा ६७ सह-प्रदर्शकाः सम्मिलिताः सन्ति।वाणिज्य-उद्योग-मन्त्रालयेन उक्तं यत् अस्यां मेलायां भारतस्य सहभागिता देशस्य समृद्धां कृषि-परम्परां जैविक-उत्पादानां प्रमुख-वैश्विक-प्रदातृरूपेण भारतस्य सामर्थ्यं च प्रकटयिष्यति। अस्मिन् मण्डपे २० तः अधिकानां राज्यानां केन्द्रशासितप्रदेशानां च प्रदर्शकाः भागं गृह्णन्ति, ये देशस्य कृषि-विविधतां दर्शयन्ति। अत्र तण्डुलः, तिलहनं, औषधयः, मरीचिकाः (spices), द्विदलानि (pulses), काजवम्, आर्द्रकं, हरिद्रा, स्थूल-एला, दालचीनी, आम्र-प्यूरी तथा सुगन्धित-तैलादीनां (essential oils) विविधानां जैविक-उत्पादानां प्रदर्शनं भविष्यति




## प्रधानमन्त्री-किसान-योजनाः २१ देयकेषु ४ लक्षकोटिरुप्यकेभ्यः अधिकं धनं वितरितम्

प्रधानमन्त्री-किसान-योजनायाः आरम्भात् आरभ्य सर्वकारेण अधुना यावत् २१ देयकेषु (installments) ४ लक्षकोटिरुप्यकेभ्यः अधिकं धनं वितरितम् अस्ति। कृषि-कृषक-कल्याण-राज्यमन्त्री रामनाथ ठाकुरः लोकसभायां एकस्य प्रश्नस्य लिखितोत्तरे एतां सूचनां दत्तवान्। सः अवदत् यत् प्रधानमन्त्री-किसान-योजना एका 'केन्द्रीय-क्षेत्रस्य' योजना अस्ति।प्रधानमन्त्री नरेन्द्र मोदी २०१९ तमस्य वर्षस्य फरवरी-मासे कृषकाणाम् आर्थिक-आवश्यकतानां पूर्तये अस्याः आरम्भं कृतवान् आसीत्। श्रीठाकुरः उक्तवान् यत् अस्याः योजनायाः अन्तर्गतं प्रतिवर्षं ६,००० (षट्सहस्र) रुप्यकाणां वित्तीय-सहायता तिसृषु किस्तिषु हस्तान्तरिता क्रियते। सः अपि अवदत् यत् कृषक-केन्द्रित-डिजिटल-आधारभूत-संरचनायाः कारणेन एतत् सुनिश्चितं जातं यत् योजनायाः लाभः देशस्य सर्वेषां कृषकाणां पार्श्वे विना कस्यपि मध्यस्थस्य (mediator) साक्षात् प्राप्नोति।

## सुभाषितम्

**उपकर्तुं कृतघ्नस्या-**
**प्युभयोरिति भिदा।**
**सद्यो हि विस्मरत्याद्यः**
**कृतं पश्चात्तु पश्चिमः।।**

-महासुभषितसंग्रह

एक कृतघ्न व्यक्ति के प्रति उपकार करने से दोनों पक्षों में मतभेद हो जाता है, क्योंकि ऐसा अकृतज्ञ व्यक्ति उपकार किए जाने पर निश्चय ही बाद में शीघ्र ही उस उपकार को भूल जाता है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## महाराष्ट्रस्य १२ मण्डलपरिषदां १२५ पञ्चायतसमितीनां च निर्वाचनपरिणामाः घोषिताः

महाराष्ट्रराज्ये १२ मण्डलपरिषदां (जिला परिषद) १२५ पञ्चायतसमितीनां च निर्वाचनपरिणामाः परह्यः घोषिताः। भारतीयजनतापार्टी (भाजपेति) १२ मण्डलपरिषत्सु ६ परिषत्सु सर्वाधिकानि स्थानानि प्राप्तवती। राज्यस्य आहत्य ७३१ मण्डलपरिषद्-स्थानेषु भाजपेन २२५ स्थानानि जितानि। राष्ट्रवादीकाङ्ग्रेसदलेन १६५ स्थानानि, शिवसेनया च १६२ स्थानानि जितानि। काङ्ग्रेसदलं ५५ स्थानानि, शरदचन्द्रपवारस्य नेतृत्वे राष्ट्रवादीकाङ्ग्रेसदलं २६ स्थानानि तथा च उद्धवबालासाहबठाकरे-नेतृत्वे शिवसेना ४३ स्थानानि प्राप्तवन्तः।१२५ पञ्चायतसमितीनां आहत्य १४६२ स्थानेषु भाजपेन सर्वाधिकानि ४५९ स्थानानि जितानि। राष्ट्रवादीकाङ्ग्रेसदलेन ३०६ स्थानानि, शिवसेनया ३०२ तथा च काङ्ग्रेसदलेन ९७ स्थानानि लब्धानि।

# 'बस्तर-पाण्डुम-उत्सवः' बस्तरक्षेत्रस्य समृद्धसंस्कृतिं, परम्पराः, जनजातीय-विरासतं च उत्कृष्टरीत्या प्रदर्शितवान्-प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्र मोदी उक्तवान् यत् छत्तीसगढराज्ये आयोजितः 'बस्तर-पाण्डुम-उत्सवः' बस्तरक्षेत्रस्य समृद्धसंस्कृतिं, परम्पराः, जनजातीय-विरासतं च उत्कृष्टरीत्या प्रदर्शितवान्। सामाजिक-माध्यमे स्वसन्देशे श्री मोदी अवदत् यत् पूर्वं यदा बस्तरक्षेत्रस्य नाम गृह्यते स्म, तदा माओवादस्य, हिंसायाः, विकासशून्यतायाः च चित्रं प्रकटीभवति स्म। किन्तु इदानीं स्थितिः सर्वथा परिवर्तिता अस्ति। बस्तरक्षेत्रं विकासस्य सहैव स्थानीयजनानां वर्धमान-आत्मविश्वासस्य कृते ज्ञायते। श्री मोदी अवदत् यत् एतादृशाः उत्सवाः भारतस्य सांस्कृतिक-उत्तराधिकारस्य रक्षणे तथा स्थानीयसमुदायानां सक्षमीकरणे महत्त्वपूर्णां भूमिकां निर्वहन्ति। सः उत्सवेन सम्बद्धान् सर्वान् जनान् वर्धापितवान्। प्रधानमन्त्री आशां प्रकटितवान् यत् आगामि-समयः अस्य क्षेत्रस्य कृते शान्ति-प्रगति-सांस्कृतिकगौरवभावनाभिः परिपूर्णः भविष्यति। छत्तीसगढराज्ये बस्तर-पाण्डुम-उत्सवः फरवरी-मासस्य ७ दिनाङ्कतः ९ दिनाङ्कपर्यन्तम् आयोजितः आसीत्।

# मण्डी-शिवरात्रि-महोत्सवः,सांस्कृतिक- सञ्चलने देश- विदेशीय-संस्कृतेः दर्शनं दर्शयिष्यति, पञ्चविंशतिः दलाः भागं गृह्णन्ति



**हिमसंस्कृतवार्ताः- मंडी।**मण्डीनगरे आयोजिते अन्तरराष्ट्रीय- महाशिवरात्रि- महोत्सवे अस्मिन् वर्षे सांस्कृतिक- सञ्चलनः अधिकं भव्यरूपेण आयोजितः भविष्यति। २० फरवरी तिथौ सायंकाले इन्दिरा-मार्केट तथा सेरीमञ्चस्य समीपे आयोजिते अस्मिन् कार्यक्रमे १०–१२ देशेभ्यः आगताः कलाकाराः स्व-स्व- देशीसंस्कृतेः मनोहररूपं प्रस्तोष्यन्ति। अस्मिन् सञ्चलने पञ्चविंशतिः सांस्कृतिकदलानि भागं गृहीत्वा विविधतायाः परम्पराणां च अद्भुतं सङ्गमं दर्शकाणां पुरतः स्थापयिष्यन्ति। एषः आयोजनस्य द्वितीयः संस्करणः अस्ति, यस्य विषये स्थानीयजनानां कलाकाराणां च मध्ये विशेषः उत्साहः दृश्यते। अस्मिन् कार्यक्रमे फ्रान्स- अमेरिका- नाइजीरिया- तञ्जानिया- ताजिकिस्तान- श्रीलङ्का इत्यादिभ्यः देशेभ्यः आगताः कलाकाराः पारम्परिक-वेशभूषाभिः, लोकनृत्यैः, संगीतैः च स्वकीयं सांस्कृतिकपरिचयम् अभिव्यक्तं करिष्यन्ति।स्थानीय-प्रदेशीय-स्तरे अपि अस्य आयोजनस्य व्यापकः सहभागः अस्ति। मण्डी-जनपदायाः संस्कृतिं दर्शयन्तः पञ्च–षट दलाः लोकसंस्कृतेः साक्षात्कारं करिष्यन्ति। हिमाचलप्रदेशस्य सप्त- जनपदेभ्यः आगताः दलाः स्व-स्व-लोकपरम्पराणां प्रदर्शनं करिष्यन्ति। एतेषु कुल्लू-प्रदेशस्य प्रसिद्धः फागलीमेलः, किन्नौर-प्रदेशस्य रोनालीमेलः इत्यस्य दर्शनम् अपि दर्शकाणां दृष्टिगोचरं भविष्यन्ति। अनेन सह देशस्य षट् राज्येभ्यः आगताः दलानि अपि स्व-लोकसंस्कृत्या, नृत्यैः, गीतैः च कार्यक्रमं नानारङ्गैः अलङ्करिष्यन्ति।आयोजनसमितेः कथनानुसारं सांस्कृतिक- सञ्चलनस्य उद्देश्यं विभिन्नदेशानां प्रदेशानां च परम्पराणाम् एकस्मिन् मञ्चे सङ्गमेन सांस्कृतिकसंवादं सुदृढीकरणं कर्तुम् अस्ति। प्रशासनं आयोजन-समितिः च कार्यक्रमस्य सज्जां तीव्रतया कुर्वन्ति। अपेक्षा व्यक्ता कृता यत् बहवः जनाः अस्मिन् सांस्कृतिक-महोत्सवे सम्मिलित्वा उत्सवस्य साक्षी भविष्यन्ति।

उपायुक्त-कार्यालय-परिसरात् आरभ्य सेरी-मञ्चेन गत्वा इन्दिरा-मार्केट-परिसरे परिभ्रमणं कुर्वन्ती एषा सांस्कृतिक-सञ्चलनः आयोजितः भविष्यति। अस्यां सञ्चलने भागग्रहणाय त्रयस्त्रिंशत् (३३) दलानि आमन्त्रितानि सन्ति, येषु त्रयोदश (१३) अन्तरराष्ट्रीयदलानि, भारतस्य विभिन्नराज्येभ्यः षट् (६) दलानि सन्ति। अन्तरराष्ट्रीय-दलेषु संयुक्त- राज्य- अमेरिका, रूस, फ्रान्स, ताजिकिस्तान, अर्जेण्टिना, जिम्बाब्वे, तञ्जानिया, नाइजीरिया, घाना, बोलीविया, नेपाल, भूटान, श्रीलङ्का इत्यादीनां देशानां सांस्कृतिकदलानि सम्मिलिताः सन्ति। भारतदेशात् राजस्थानं, गुजरातं, उत्तराखण्डं पञ्जाबः, असमः, मणिपुरम् इत्यादि राज्याणि सम्मिलितानि सन्ति। शिमला, हमीरपुर, लाहौल् स्पीति, कुल्लू, चम्बा, किन्नौर इत्येतेभ्यः अपि दलानि भागं गृह्णन्ति।संस्कृतेः, परम्परायाः, विविधतायाः च सङ्गमरूपः एषः आयोजनः नगरे अन्तरराष्ट्रीय-वातावरणं निर्मास्यति। अस्मिन् वर्षे सांस्कृतिक-पराडः पूर्वापेक्षया अधिकं भव्यतया आयोजितः भविष्यति।

# विक्रमादित्यस्य धर्मपत्न्या सह पीपल- संस्कार- पूजायां सहभागिता

विक्रमादित्यसिंहः धर्मपत्न्या डॉ. अमरीनसिंहया सह सुन्नीचौके आयोजितायां पीपल- संस्कार- पूजायां सहभागी अभवत्। विधि-विधानानुसारं दम्पती पीपलवृक्षस्य सप्तप्रदक्षिणाः अपि कृतवन्तौ। सः अवदत् यत् एषः पीपल-वृक्षः तस्य पित्रा पूर्वमुख्यमन्त्रिणा स्वर्गीय- राजा- वीरभद्रसिंहेन 2014–15 तमे वर्षे रोपितः आसीत्। परिवार-समेतम् अस्मिन् कार्यक्रमे सहभागितायाः अवसरः प्राप्तः इति हर्षस्य विषयः इति सः अवदत्। सः अवदत् यत् पीपल-संस्कार-पूजा केवलं धार्मिक-अनुष्ठानं न, अपि तु स्मृति- संस्कार- सेवायाः सजीव-श्रृङ्खला अस्ति। स्वर्गीयः राजा वीरभद्रसिंहः स्वस्मिन् सार्वजनिक-जीवने विकास-पर्यावरणयोः सन्तुलनं सदा प्राथमिकतां दत्तवान्। वृक्षारोपण- अभियानेषु सक्रिय- सहभागितया तथा कोटि- कोटि- वृक्ष- रोपण- सङ्कल्पेन सः हिमाचल-प्रदेशस्य हरितिमा-भविष्यं च सुदृढं कर्तुं प्रयत्नं कृतवान्। अतः सुन्नी-क्षेत्रे तेन रोपितस्य पीपलवृक्षस्य संस्कारपूजा तस्य पर्यावरण- संवेदनशीलदृष्टेः तथा "हरियाली एव समृद्धिः" इति विश्वासस्य विनम्र-नमनं अपि अस्ति।

# भारतम् २७२ गीगावाट-परिमितं नवीकरणीय-ऊर्जा-क्षमतां

## प्राप्तवान्: केन्द्रीयमन्त्री प्रल्हाद जोशी



केन्द्रीय-नवीन-एवं-नवीकरणीय-ऊर्जा-मन्त्री प्रल्हाद जोशी महोदयः उक्तवान् यत् भारतेन अधुना यावत् २७२ गीगावाट-परिमितं कुल नवीकरणीय-ऊर्जा-क्षमतां प्राप्तम्। राज्यसभायां एकस्य प्रश्नस्य लिखितोत्तरे श्रीजोशी अवदत् यत् कांग्रेस-शासनकाले देशस्य नवीकरणीय-ऊर्जा-क्षमता केवलं ८१ गीगावाट-परिमिता आसीत्। सः सूचितवान् यत् सौर-ऊर्जा-क्षमता इदानीं वर्धित्वा १३६ गीगावाट-परिमिता जाता अस्ति। भारतम् अद्य विश्वे नवीकरणीय-ऊर्जायाः तृतीयः बृहत्तमः उत्पादक-देशः रूपेण समुत्पन्नः।श्रीजोशी अकथयत् यत् 'पीएम-कुसुम-योजनायाः' लाभः देशव्यापिनः जनाः प्राप्नुवन्ति। ग्रामीण-क्षेत्रेषु अस्याः सफलतां दृष्ट्वा अनेके राज्याः अस्याः विस्तारस्य याचनां कुर्वन्ति। अस्यां योजनायां सौर-पम्पानां स्थापना, ग्रिड-सम्बद्धानां कृषि-पम्पानां सौर-ऊर्जया सञ्चालनं, तथा च नवीकरणीय-ऊर्जा-संयन्त्राणां (renewable energy plants) स्थापनायाः प्रावधानम् अस्ति। सः अग्रे उक्तवान् यत् हरित-हाइड्रोजन (Green Hydrogen) क्षेत्रे वैश्विक-भविष्यस्य निर्धारणे भारतं अग्रणीं भूमिकां निर्वहति। गतवर्षस्य नवम्बर-मासपर्यन्तं देशे ८,३०० टन-प्रतिवर्ष-क्षमतायुक्ताः आहत्य २१ हरित-हाइड्रोजन-परियोजनाः आरब्धाः सन्ति।



# गोसदने गवाम् आहार-प्रदानं, विश्रामगृहे जनसमस्याश्रवणं च

पीपल- संस्कार- पूजा- समापनानन्तरं विक्रमादित्यसिंहः धर्मपत्न्या सह गोसदनं गत्वा गवाम् आहारं प्रदत्तवान्। ततः अनन्तरं सः सुन्नी- विश्रामगृहे जनानां समस्याः श्रुत्वा तासां समाधानं सुनिश्चितं कृतवान्।

**अस्मिन् अवसरे उपस्थिताः**

अजय लट्ठः, शिमला-ग्रामीण-कांग्रेसस्य पूर्व-अध्यक्षः गोपाल शर्मा, नगर-पञ्चायत-सुन्नी पूर्वाध्यक्षः प्रदीप शर्मा, उपाध्यक्षः श्यामा देवी, विपिन शर्मा, प्रदीप वर्मा, गिरीशः, कवीन्द्र कंवरः, कपिल गुप्ता, अन्ये गणमान्याः चापि उपस्थिताः आसन्।



## डॉ. युवराजः भट्टराई

कविः लेखकः शिक्षकः संस्कृतपत्रकारश्च

# संस्कृतपत्रकारितायाः अनुभवाः, परिवर्तनानि, समाह्वानानि च (अनुभवाधारितः विमर्शात्मकः लेखः)

**प्रस्तावना**

अहं २०१२ तमे वर्षे आकाशवाण्याः संस्कृत-पत्रकारितया साकम् अधुना यावत् निरन्तरं संलग्नो वर्त्ते, तथा २०१५ तः २०२३ पर्यन्तं दूरदर्शनस्य (DD News) संस्कृत-टेलिविज़न-पत्रकारितायाम् अपि सक्रियतया कार्यं कृतवान्। एषा दीर्घा यात्रा केवलं व्यवसायिकानुभवः नास्ति, अपि तु भाषा–समाज–सम्प्रेषण–सम्बन्धानां परिवर्तनशीलं स्वरूपं बोधयितुं सहायकः एकः गम्भीरः अभ्यासो वर्त्तते।

आकाशवाणी–दूरदर्शनयोः संस्कृत- एकांशः एतस्याः परिवर्तनशीलायाः संस्कृतपत्रकारितायाः यात्रायाः प्रत्यक्षरूपेण साक्षी अस्ति। अयमेव तन्मञ्चः यत्र संस्कृतभाषा परम्परायाः वहनकर्त्री अपि अभवत्, आधुनिक-साञ्चारिक-समाह्वानैः सह संघर्षं कुर्वन्ती अपि दृश्यते।

### "संस्कृतपत्रकारितायां भाषिकपरिवर्तनम्"

एतस्मिन् यात्राकाले एतत् स्पष्टं जातम् यत् संस्कृतपत्रकारितायाः भाषा सम्प्रति पूर्ववत् नावतिष्ठते। केवलं प्रसारकाः एव न, अपि तु श्रोतारः दर्शकाः च संस्कृतभाषायाः वैश्वीकरणस्य (Globalization) प्रभावं अनुभवितुं आरब्धवन्तः सन्ति।

प्रसारणसंस्थासु कार्यरताः अधिकारिणः प्रायः आङ्ग्लनाम्नां तथा आङ्ग्लशब्दानां यथायथम् आङ्ग्लरूपेण प्रयोगमेव समर्थयन्ति, तदर्थं निर्दिशन्ति च। अस्य परिणामस्वरूपं संस्कृतप्रसारणेषु आङ्ग्लशब्दानां प्रयोगप्राधान्यं वर्धितम्, यत् संस्कृतभाषायाः पारम्परिक-संरचनायाः विषये नवान् प्रश्नान् समुद्भावयति।

"संस्कृतपत्र-पत्रिकाः सञ्चारमाध्यम-बहुलता च"

एतस्मिन्नेव कालखण्डे अनेकाः संस्कृतपत्र-पत्रिकाः अपि उत्पन्नाः, कतिपयीनां पत्रपत्रिकाणां प्रवर्तनस्य प्रेरणा प्रत्यक्षतया परोक्षतया वा अमुनैव जनेनापि प्रदत्ता। स्वयमपि तेषां तासां च कृते वार्त्तालेखनादिकं कृतम्। यद्यपि अद्य तासां पत्रिकाणां संख्या अत्यल्पा अङ्गुलीगण्या एव दृश्यते।

एषा स्थिति सूचयति यत् यावन्ति माध्यमानि, तावन्ति एव संस्कृतभाषायाः रूपाणि दृश्यन्ते। आकाशवाणी, दूरदर्शनम्, मुद्रितपत्रिका, डिजिटलमाध्यमं—सर्वत्र संस्कृतस्य भिन्नं भिन्नं स्वरूपं दृश्यते, येन संस्कृत-साञ्चारिक-भाषायाः एकरूपतायाम् उत कदाचितत्तु अस्मितायामेव जनैः प्रश्नः समुत्थाप्यते।

### "अनुवादप्रधान-पत्रकारितायाः समस्या"

आधुनिक्यां संस्कृतपत्रकारितायां एका प्रमुखा समस्या आङ्ग्लभाषायाम् उपलब्धानां वार्त्तानाम् अनुवादे अत्यधिकः आश्रयः भवति। विशेषतः आकाशवाणी-दूरदर्शन-सेवासु प्रसारिताः अधिकांशाः संस्कृतवार्त्ताः वस्तुतः आङ्ग्लवार्त्तानाम् अनुवादमात्रम् एव भवन्ति।यदि अस्याः प्रवृत्तेः अपनोदनाय गम्भीरः प्रयत्नः क्रियते, तर्हि संस्कृतभाषायां मौलिकपत्रकारिता पूर्णतया सम्भवति। किन्तु तदर्थं संस्कृतसमाजस्य आलोचनासहिष्णुता अपि वर्धनीया। आङ्ग्लकेन्द्रितदृष्टेः विमुक्तिं विना संस्कृतपत्रकारितायाः स्वतन्त्रास्मिता न निर्मातुं शक्यते।

### "सरलीकरणस्य सीमा भाषिकसन्तुलनञ्च"

संस्कृतभाषां सहजां सरलां ग्राह्यां कर्तुं प्रयत्नाः नित्यमेव अपेक्षिताः। तथापि एतत् सरलीकरणं तावत् न भवेत् यावत् संस्कृतभाषा स्वकीयं व्याकरणिकं तथा सांस्कृतिकं स्वभावं एव परित्यजेत्।यदि सरलीकरणं भाषायाः आन्तरिकशास्त्रीयसंरचनां क्षतिग्रस्तां नष्टां च कुरुते, तर्हि तत् भाषासंवर्धनं नास्ति, अपि तु क्षरणमेव। अतः अत्र संतुलनम् अनिवार्यम् । भाषाप्रयोगे नातिदुरूहता, न च अति-सरलीकरणं समाश्रीयेत।

### "अन्तर्जाल-युगं भाषायाः व्याप्तिश्च"

अद्य दौरभाषिक-प्रौद्योगिक्याः अन्तर्जालस्य च सार्वभौमिकतया संस्कृतभाषायाः प्रसारः अभूतपूर्वम् अभवत्। एषा अवस्था भाषिकसंवर्धनस्य दृष्ट्या निश्चयेन सकारात्मकः संकेतः अस्ति।

किन्तु अनया सह एकः अनिवार्यः प्रश्नः अपि उदेति—अन्तर्जाले प्रयुज्यमाना संस्कृतभाषा कीदृशी भवेत्?

डिजिटलमाध्यमेषु भाषायाः प्रभावः दीर्घकालिकः भवति। अतः तत्र प्रयुज्यमाना संस्कृतभाषा केवलं सुविधानुसारिणी न, अपि तु मानकीकृता, सुसंगता, दीर्घदृष्ट्या उपयोगिनी च भवेत् एतदर्थमपि अस्माभिः सावाधानैः भाव्यम्।

### "विदुषां विचारार्थं केचन प्रश्नाः"

संस्कृतपत्रकारितायाः सन्दर्भे केचन मूलभूताः आधारिकाः प्रश्नाः अवश्यमेव सन्ति विचारणीयाः—

संस्कृतप्रसारणेषु प्रयुज्यमाना भाषा परिष्कृता भवेत् उत सरलीकृता?आङ्ग्लशब्दबहुला संस्कृतभाषा एव आधुनिकतायाः प्रमाणं किम्?

केवलं आङ्ग्लवार्त्तानाम् अनुवादेन संस्कृतश्रोतॄणां पाठकानां दर्शकानां च अपेक्षाः पूरयितुं शक्यन्ते किम्?

नूतनप्रौद्योगिकीय-सम्प्रेषणमाध्यमैः सह संस्कृतभाषा समन्वयं कर्तुं समर्था अस्ति किम्?

सर्वाधिकः महत्त्वपूर्णः प्रश्नश्चायं वर्तते —किं भारतीयः समाजः वस्तुतः आधुनिकसञ्चारमाध्यमेषु समृद्धां संस्कृतभाषां द्रष्टुम् इच्छति किम्?

**"निकर्षः"**

उपर्युक्तेन विमर्शेण एतत् स्पष्टं भवति यत् संस्कृतपत्रकारिता अद्य एकस्यां निर्णायकावस्थायां स्थितास्ति। सा न केवलं परम्परामेव समाश्रित्य स्थातुं शक्नोति, न च विवेकविहीनं आधुनिकानुकरणं कर्तुं युक्ता तिष्ठति।

संस्कृतभाषायाः सामर्थ्यं तस्याः आन्तरिके शास्त्रीयनियमे, वैचारिकगाम्भीर्ये, अभिव्यक्तिक्षमतायां च निहितम् अस्ति। यदि संस्कृतपत्रकारिता मौलिकचिन्तनं, स्वतन्त्रदृष्टिं, भाषिकस्वाभिमानं च आधारीकृत्य अग्रे गच्छति, तर्हि सा न केवलं नूतनप्रसारणमाध्यमैः सह सामञ्जस्यं स्थापयितुं शक्नोति, अपि तु तान् मार्गदर्शयितुम् अपि समर्था भविष्यति।

अतः भविष्यत्कालिकी कार्यनीतिः न केवलं पूर्णरूपेण पराश्रयस्य , न च पूर्णपृथक्करणस्य भवेत्। अपेक्षिता अस्ति सचेततया समन्वयनीतिः, यत्र प्रौद्योगिकी तथा आधुनिकमाध्यमानि संस्कृतभाषायाः सेवायां स्युः, न तु संस्कृतभाषा तेषां अधीनतां गच्छेत्।

अन्ततः एतत् स्वीकरणीयं यत् संस्कृतभाषायाः भविष्यं न केवलं संस्थानैः, नीतिभिः प्रौद्योगिक्या वा निश्चितं भवति, अपि तु तैः संस्कृतपत्रकारैः, प्रसारकैः, साधकैः च निश्चितं भवति ये निर्णयं करिष्यन्ति—

संस्कृतं केवलं अनुवादभाषा भविष्यति, उत मौलिकविचारस्य स्वतन्त्रपत्रकारितायाः सशक्तः स्वरः।

## सुन्नीक्षेत्रे पञ्चविंशतिकोटि-रूप्यक-योजनया जलसंकटस्य निवारणं भविष्यति, एकस्मिन् मासे परियोजना पूर्णा भविष्यति- विक्रमादित्यसिंहः।

हिमसंस्कृतवार्ताः:- शिमला।लोकनिर्माण एवं शहरीविकासमन्त्री विक्रमादित्यसिंहः अवदत् यत् सुन्नीक्षेत्रे जलसंकट- निवारणार्थं पञ्चविंशतिकोटि-रूप्यक- योजनायाः कार्यं युद्धस्तरेण प्रचलति तथा एका मासाभ्यन्तरे एषा परियोजना कार्यान्विता भविष्यति। एतया योजनया क्षेत्रीय-जनानां जल-आपूर्तिः अधिका सुदृढा भविष्यति। सः मङ्गलवारे शिमला- ग्रामीण- विधानसभाक्षेत्रस्य सुन्नीनगरस्य पीपल- संस्कार- पूजायां सहभागित्वानन्तरं एतां सूचनां दत्तवान्। सः अवदत् यत् सुन्नी-चिकित्सालये विद्यमानानि सर्वाणि रिक्त-पदानि शीघ्रातिशीघ्रं पूरयितुं यथाशक्ति प्रयासाः क्रियन्ते। अस्मिन् विषये सः स्वास्थ्य एवं परिवार- कल्याण-मन्त्रिणा सह समये-समये विचारविनिमयं करोति, येन क्षेत्रीय-समस्यायाः समाधानं सम्भवेत्।

**केन्द्रीय-स्वास्थ्यमन्त्रिणः समक्षे क्रिटिकल-केयर- यूनिट- विषयः प्रस्तुतः भविष्यति**

विक्रमादित्यसिंहः अवदत् यत् सुन्नीक्षेत्रे क्रिटिकल-केयर- यूनिट- स्थापनायाः सैद्धान्तिक-अनुमतिः पूर्वमेव प्राप्ता आसीत्, किन्तु तस्यार्थं वित्तीय-अनुमोदनं शीघ्रं प्राप्तुं एषः विषयः केन्द्रीय-स्वास्थ्य- मन्त्रिणः समक्षे प्रस्तुतः भविष्यति, येन पञ्चविंशतिकोटि-रूप्यकाणि शीघ्रं निर्गच्छेयुः तथा भवन-निर्माण-कार्यं शीघ्रम् आरभ्येत। सः अवदत् यत् सुन्नी-क्षेत्रे बहवः विकास-कार्याः प्रचलन्ति, येषु इंटरलॉकिंग-टाइल्स-स्थापनं, सोलर- दीप-प्रतिष्ठापनं, सुन्नी-विप्पण्यां नालिका- निर्माण-कार्याणि अन्तर्भवन्ति।

## हिमाचले निर्मितानाम् औषधीनां विदेशेष्वपि वर्धमानः आग्रहः, गम्भीररोगेषु सहायिकाः

हिमसंस्कृतवार्ताः- चम्बा।

हिमाचलप्रदेशे होलिस्टिक हिमालय नामक स्टार्टअप- अन्तर्गतं स्थापिते वेलनेस सेन्टर एण्ड एक्सपीरियन्स्ड भटोली जुआंस इति केन्द्रे हिमालयस्य दुर्लभौषधीय-वनस्पतिभ्यः निर्मितानां औषधीनां पौलैण्ड, अमेरिका, जर्मनी इत्यादिषु देशेषु, दिल्ली–केरलयोः चापि, महती अपेक्षा अस्ति। अस्मिन् केन्द्रे जटा, मानसी, कुटकी, भूतकेशी, कसमल इत्यादिभ्यः बहुभ्यः औषधीय- वनस्पतिभ्यः औषधयः निर्मीयन्ते।एतत् स्टार्टअप भटोली निवासी डॉ. मोहम्मद रियाज इत्यनेन आरब्धम्। एम. बी. बी. एस. अध्ययनानन्तरं सः चम्बा-चिकित्सामहाविद्यालये प्रशिक्षुणां कृते औषधीयवनस्पतिषु तेषाम् उपयोगेषु च अध्यापनं कृतवान्। औषधीय- वनस्पतिषु रुचिम्, अनुसन्धानाभिलाषां च दृष्ट्वा सः महाविद्यालयीयां सेवां त्यक्त्वा आयुष-विभागे कार्यं कृतवान्।

डॉ. रियाज कथयति यत् चम्बा-प्रदेशस्य तथा समीपवर्तीक्षेत्राणाम् औषधीय-वनस्पतीनां बलात् एव उत्कृष्टाः औषधयः निर्मातुं शक्यन्ते। देश- विदेशयोः अनुभवम् अर्जयित्वा सः स्वपैतृक-गृहं प्रत्यागत्य एतत् केन्द्रम् आरब्धवान्। अद्यतनकाले तस्य उत्पादानां उपयोगः एम्स बिलासपुरे अन्यैः चिकित्सकैः चापि क्रियते। तस्य अनुसन्धानपत्राणि ऑक्सफोर्ड विश्वविद्यालये प्रकाशितानि सन्ति।



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# बालाः संस्कारमुखाः स्युः

पाश्चात्यसंस्कृतेः प्रभावतः अद्यतनाः बालाः शनैः स्वकीयं संस्कृति-संस्कारादिकं विहाय विपरीतदिशि धावमानाः दृश्यन्ते। एते हि भविष्यसमाजस्य धरोहराः, राष्ट्रस्य नागरिकाः च सन्ति। परन्तु यदि ते भारतीयपरम्परां विस्मृत्य स्वेच्छया इतरसंस्कृतिं स्वीकुर्युः तर्हि, अद्यतनं भारतं शनैः भारतत्वेन न तिष्ठेत्। यतोहि पारम्परिकी संस्कृतिर्हि कस्याश्चन जातेः, देशस्य वा परिचयः कथ्यते। बाल्यकाले, पित्रोः सान्निध्ये स्थित्वा स्वगृहतः एव कश्चन मनुष्यः जीवने संस्कारमुखः भवितुमर्हेत्। एतदर्थं पित्रोः महद्दायित्वमस्ति। तौ स्वसन्तिभ्यः संस्कारं, सच्छिक्षां च प्रदातुं प्रयत्नं कुर्याताम्। सम्प्रति नवयुवयुवतीनां स्थितिः अतीव गम्भीरपूर्णा सञ्जाता अस्ति। अस्माकं हिन्दुसमाजे चत्वारः आश्रमाः भवन्ति- ब्रह्मचर्यः, गृहस्थः, वानप्रस्थः, संन्यासः चेति। प्रत्येकम् आश्रमः पञ्चविंशतिवर्षकालिको भवति। जन्मतः २५-वर्षाणि यावत् ब्रह्मचर्यव्रतस्य पूर्णतः पालनं, गुरुतः शिक्षार्जनम्, अनुशासनम् इत्यादिकार्यार्थं तत्कालो युज्यते। द्वितीयपर्याये २५ तः ५० वर्षाणि यावत् कालावधौ सुविवाहः, गृहसेवासम्बन्धकार्यम्, अपत्यानाङ्कृते समुचिता संस्कारशिक्षादिव्यवस्था, पालनपोषणं, धर्मन्यायसम्बन्धकार्यम् इत्यादिकं कर्तव्यं, धर्मपूर्वकं दायित्वस्य पालनं वा भवति। एवं ५० तः ७५ कालावधौ सन्ततिभ्यः सर्वं गृहकार्यभारं समर्प्य सांसारिकेभ्यो मायामोहादिभ्यः आत्मानं निष्कास्य सत्यतत्त्वस्य अन्वेषणं, भगवद्भजनम्, सत्सङ्गः, धर्मज्ञानादीनां प्रसारणम् इत्यादिकं दायित्वं भवति। एवञ्च अन्तिमे पर्याये सन्यासाश्रमे मनुष्येण पूर्णतो वीतरागेण सता केवलं परमसत्यरूपाय परब्रह्मणे आत्मा समर्पणीयो भवति इति पूर्णायुष्कालावधौ मनुष्याचरणस्य सनातनपरम्परा। परन्तु अद्यत्वे अस्माकं सन्ततयः विद्यार्जनकाले, ब्रह्मचर्यकाले वा स्वतन्त्रतया, निर्बाधञ्च 'बायफ्रेण्ड', 'गार्लफ्रेण्ड' इत्यादिकं विधाय यथामति आचरन्तः अवलोक्यन्ते। अनाचरणकारणतो यदि बाल्यकाले हि ते तेजोहीनाः, दुर्बलाः च स्युः, तर्हि देशरक्षकाः वीरपुरुषाः, धर्मरक्षकाः दूरदर्शिनः, सुनागरिकाः वा ते अग्रिमकालेषु कथञ्च भवेयुरिति समाजचिन्तकानां मनसि एकं महच्चिन्तनं, महत्प्रश्नचिह्नञ्च बाधमानमस्ति अधुना। अत्र परमदोषभाक् तु बलिवूड्, फेसबुक्, पाश्चात्यशैली इत्यादिरेव स्यादिति वक्तुं शक्यते। एतादृशं नवप्रजन्मनो हानिकारकं साधनं शीघ्रं हि निग्रहणीयं भवेत्, अन्यथा नवयुवयुवतयः सर्वे इतोऽपि नष्टाः, भ्रष्टाः च भवेयुरित्यत्र न शङ्का। अतः तस्मात् दुस्थितितः संरक्षणं प्राप्तुं सर्वैः सम्यक् अवधातव्यम्, अन्यथा भारतीय-सनातन- संस्कृत्यादिकं शनैरितः विलयतां गच्छेदिति। यदा तद्विलयतां गच्छेत्, तदा भारतीयत्वस्य परिचयः पूर्णतः विनश्येत्। तस्मात् प्रत्येकं सनातनधर्मावलम्बिभिः जनैः विशेषतः, बालैः स्वसंस्कारसंस्कृत्यादीनां संरक्षणम् अवश्यं कर्तव्यमिति।

# "लौकिकन्यायकोशः"

# "उष्ट्रशूलन्यायः"

उष्ट्रस्य उदरे पीडा भवति चेत् औषधं किम्? औषधम् आसक्तिजनकम् अस्ति। एकः शूलः उष्णीकृत्य तस्य शरीरस्य उपरि स्थापनीयः। मनुष्यस्य अपि एवमेव। लघुपीडायाः कारणेन दुःखं वदति तर्हि महती पीडा सहनीया भवति।

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्

# लौकिकन्यायकोश*" (३९८)

# रुमाक्षिप्तकाष्ठन्यायः*"

रुमानामके लवणसमुद्रे क्षिप्तं काष्ठम् अपि लवणं भवति इति कथयन्ति जनाः | सङ्गत्याः अयं महिमा यत् सङ्गतं वस्तु तदाकारं भजति | यथा--

{१} यथा रुमाया लवणकारेषु मेरौ यथा वोज्ज्पलरुक्मभूमौ | यज्जायते तन्मयमेव तत् स्यात् तथा भवेद् वेदविदात्मतुष्टिः ||
(ततन्त्रवार्तिके पृष्ठे १३१)

{२} बहूनामेकत्र परिणामो दृष्टः | गवाश्वमहिषमातङ्गानां रुमाक्षिप्तानाम् एको लवणत्वजातीयलक्षणः परिणामः वर्ति- तैल- अनलानां च प्रदीप इति |
(वाचस्पतिमिश्र तत्ववैशारद्यां ४-१४)

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्

हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य मया एका विचित्रा वार्ता पठिता। एकस्मिन् आभासीय-क्रीडा-लोके (Virtual game world) केनचित् सेवकेन आभासीय-सुवर्णं चोरितम्। तेन तत् सुवर्णं विक्रीय वास्तविकं धनं प्राप्तम्।

**नन्दिनी-** अहो! आभासीय-चौरकार्यम् अपि इदानीं सत्यं जातम्। तस्य धनस्य लोभः महत्तरः। धनस्य विषये अन्या एका वार्ता अस्ति। एकस्य वस्त्र-निर्मलीकरण-कर्तुः (Dry cleaner) आयः दृष्टः। तस्य आयः कस्यचित् तन्त्रज्ञस्य (Engineer) आयतः अपि अधिकः वर्तते इति जनेन सूचितम्।

**काव्या-** सत्यम्, श्रमेण विना किमपि न लभ्यते। निर्मलीकरणेन धनलाभम् श्रुत्वा जनाः विस्मिताः। विवाह-विषये अपि एका वार्ता मया दृष्टा अस्ति। एकेन पुरुषेण विवाह-योग्यानां कन्यानां विवरणं सङ्गणक-कोष्ठक-रूपेण (Excel sheet) निर्मितम्। सः पुरुषः सर्वं विवरणं लिखितवान् अस्ति।

**नन्दिनी-** विवाह-निश्चये एषा उत्तमरीतिः। कोष्ठक-साहाय्येन भविष्य-सौख्यार्थं सः स्पष्टतां प्राप्तः। भावनाः तु सन्ति, परं व्यवस्था अपि आवश्यकी।

**काव्या-** अस्तु। अन्तिमा भीषणा वार्ता श्रुता। एकेन पुरुषेण स्वं दष्टवान् विषधर-सर्पः एव हस्तेन गृहीतः।

**नन्दिनी-** आम, सः सर्पः चिकित्सालयं प्रति आनीतः यतः वैद्याः विष-प्रकारं ज्ञातुं शक्ताः जाताः। एतत् धाष्टर्यं जीवनरक्षकं सिद्धम्।



# बालकथा-काक-कुर्म-मृग-मूषकानां कथा

कथाः एकस्मिन् वने चत्वारः मित्राणि वसन्ति स्म— एकः काकः (कौआ), एकः मूषकः (चूहा), एकः कच्छपः (कछुआ) च एकः मृगः (हिरण)। ते परस्परं स्नेहेन कालं यापयन्ति स्म।

एकदा मृगः व्याधस्य (शिकारी के) जाले बद्धः अभवत्। सः उच्चैः आरटत्। तस्य स्वरं श्रुत्वा त्रयः अपि मित्राणि तत्र आगच्छन्। मूषकः स्वतीक्ष्णदन्तैः जालं अकर्तयत् (काट दिया) मृगः च मुक्तः अभवत्। किन्तु तदैव तत्र व्याधः आगतः। व्याधं दृष्ट्वा मृगः, काकः, मूषकः च पलायिताः (भाग गए)। किन्तु मन्दगतिः कच्छपः पलायितुं न अशक्नोत्। व्याधः तं गृहीत्वा कण्डोले (टोकरी में) अस्थापयत्। मित्राणि दुःखिताः अभवन्। ते एकं उपायं अचिन्तयन्। मृगः व्याधस्य मार्गे मृतः इव अपतत् (मरने का नाटक किया)। काकः तस्य उपरि उपविश्य तस्य चक्षुः खादितुं प्रयत्नं अकरोत्। व्याधः चिन्तितवान्— "अहो! अयं मृगः तु मृतः अस्ति।" सः कच्छपं भूमौ निक्षिप्य मृगं ग्रहीतुं अधावत्। तदैव अवसरं प्राप्य मूषकः कच्छपस्य बन्धनं अकर्तयत्। कच्छपः झटिति जलाशये प्राविशत्। मृगः अपि उत्थाय वेगेन अधावत्। एवं चत्वारि अपि मित्राणि पुनः मिलितानि प्रसन्नानि च अभवन्।